**केन्द्रीय विद्यालय एन. डी. ए. ,पुणे**

**आवधिक परीक्षा द्वितीय - ( 2018-19)**

**कक्षा- दशम्**

**समय: होरात्रयम्** **पूर्णांका:-80**

निर्देशा: - 1- प्रश्नपत्रे चत्वार: खण्डा: सन्ति ।

खण्ड: 'क' अपठित अवबोधनम् - 10 अङ्का:

खण्ड: ' ख ' रचनात्मक कार्यम् - 15 अङ्का:

खण्ड: 'ग ' अनुप्रयुक्त व्याकरणम् - 25 अङ्का:

खण्ड: 'घ ' पठित अवबोधनम्- 30 अङ्का:

2- सर्वे प्रश्ना: अनिवार्या: ।

3- प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि ।

4- उत्तराणि संस्कृतेन एव लेखनीयानि ।

**( खण्ड: 'क' अपठित अवबोधनम्** ) 10 अङ्का:

**प्रश्न न॰1**- अनुच्छेदम् पठित्वा प्रश्नानाम् उत्तराणि लिखत-

गङ्गा भारतस्य सर्वासु नदीषु पवित्रतमा अस्ति। इयम् हिमालयस्य गंगोत्री स्थानात् निर्गच्छति। पर्वतस्य प्रान्तेभ्य: नि:सृत्य

गङ्गा हरिद्वारनामके स्थाने समतलं भूभागम् स्पृशति। हरिद्वारतीर्थे प्रतिवर्षम् असंख्यजना: आयान्ति। तत्र गङ्गाया: शीतलम्

निर्मलम् च जलम् अस्ति। पूर्वजानाम् उद्धाराय भगीरथस्य प्रभावेण गङ्गा स्वर्गात् भूतले अवतीर्णा जाता। यदा इयम् गंगोत्रीत:

निकसति तदा अस्या: प्रभाव: लघु: भवति। अग्रे अनेके निर्झरा: अस्याम् नद्याम् आमिलन्ति, तै: गंगाया: प्रवाह: तीव्र: भवति।

अस्या: तटे ऋषिकेश: हरिद्वारम्, प्रयाग:, वाराणसी च एतानि प्रधानानि तीर्थस्थानानि सन्ति। गङ्गा जलम् तु अमृतम् कथ्यते।

अ). एकपदेन उत्तरत - [1/2x4=2]

(i) नदीषु पवित्रतमा नदी का ?

(ii) हरिद्वारे प्रतिवर्षे कियन्त: जना: आगच्छन्ति ?

(iii) स्वर्गात् का भूमौ आगता ?

(iv) केषाम् उद्धाराय भगीरथेन तप: कृतम् ?

ब) पूर्णवाक्येन उत्तरत - [2x2=4]

(i) गङ्गा तटे कानि सन्ति ?

(ii) कुत: नि:सृत्य गङ्गा समतलं भूभागम् स्पृशति ?

स). भाषिककार्यम्- निर्देशानुसारेण उत्तरत - [1x4=4]

1. ' स्पृशति ' इति पदस्य मूलधातु: क: ?

(i) स्पृश (ii) स्पृश् (iii) स्पूश (iv) शप्रुश

2. ' इयम् ' इति सर्वनाम् पदम् कस्यै प्रयुक्तम् ?

(i) गङ्गायै (ii) जलाय (iii) पर्वताय ( iv ) निर्जलाय

3. ' सन्ति ' इति क्रिया पदस्य किम् कर्तृपदम् ?

(i) तीर्थस्थानानि (ii) गंगा (iii) भूभाग: ( iv ) जलधारा

4. ' धर्मस्थानानि ' इति पदस्य पर्यायपदम् किम् ?

(i) भवनानि (ii) गृहाणि ( iii ) नगराणि ( iv ) तीर्थस्थानानि

**(खण्ड: ' ख ' रचनात्मक कार्यम्** )

**प्रश्न न०-2**- विद्यालयस्य वार्षिकोत्सवम् अधिकृत्य मित्रं प्रति लिखिते पत्रे मञ्जूषाशब्दै: रिक्तस्थानपूर्तिं कुरुत। [1/2x10=5]

(i) ---------------------

कुरुक्षेत्रम्।

दिनाङ्क: ----------

प्रिय (ii) ____________________

(iii) ________________ तव पत्रम् अधिगतम्। मया पत्रेण ज्ञातं यत् गत सप्ताहे विद्यालयस्य (iv) ___________असीत् । त्वं सर्वे अध्यापका: च (v) _____________ अतिष्ठन् । कार्यक्रमस्य मुख्यातिथि: (vi) ________ असीत् । स: (vii) _________ कार्यक्रमस्य प्रशंसाम् अकरोत्। (viii)------------ छात्रेभ्य; पुरस्कारान् प्रायच्छत् । पितृभ्याम् सादरम् (ix)-------------।

भवत: (x) --------------

मुकेश:

[ शिक्षानिदेशक: , मया , परीक्षाभवनं , वार्षिकोत्सव: , व्यस्ता: , प्रणामा: , युष्माकम् , योगेभ्य: , प्रियमित्रम् , मित्र ]

**प्रश्न०-3**- 'मम विद्यालय: ' इति विषयमधिकृत्य मञ्जूषाया: प्रदत्तशब्दानाम् सहायतया संस्कृतेन पञ्चवाक्यानि लिखत- [2x5=10]

[ विद्यालयम् , भवनम् , अध्यापका: , प्रधानाचार्य: , क्रीडाक्षेत्रम् , पुस्तकालया: , संगणककार्यशाला , छात्रावास:, जलपानगृहम् , प्रतियोगिता: , परीक्षाफलम् ]

**अथवा**

चित्रम् दृष्ट्वा मञ्जूषा-सहायतया संस्कृते पञ्चवाक्यानि लिखत- [2x5=10]



[ घटे , क्रीडन्ति , भाण्डानि , मृत्तिका , ग्रामस्य , कुक्कुराः , सन्ति , एका महिला , अनेकानि , प्रक्षालयन्ति
दृश्यम् , गृहाणि , जलम् , भरति , बालकाः , मार्गे , सन्ति ]

**खण्डः 'ग ' अनुप्रयुक्त व्याकरणम् - 25 अङ्का**

**प्रश्न॰-4**- अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिच्छेदं सन्धिं वा विधाय उत्तरपुस्तिकायाम् लिखत- [1x5=5]

1- मनसः निग्रहः वायो:+इव सुदुष्करम् ।

क- वायोइव ख- वायोरिव ग- वायेव

2- भरते सदा+ऐक्यस्य वासः भवेत् ।

क- सदैक्यस्य ख- सदौक्यस्य ग- सदाक्यस्य

3- सर्वथा जाकरुकोऽहम् विद्यार्थिनाम् कृते आदर्शः ।

क- जाकरुको+अहम् ख- जागरुकः+अहम् ग- जागरुक+अहम्

4- नैतदस्त्रम् मनुष्येषु प्रयोक्तव्यम् कथञ्चन ।

क- कथन्+चन ख- कथम्+चन ग- कथञ्+चन

5- कथमपि न एतच्छक्यम् ।

**प्रश्न॰-5**-रेखाङ्कितपदेषु समासं विग्रहम् वा विधाय उत्तरपुस्तिकायाम् लिखत- [ 1x4=4 ]

1- पाठशालायाम् अध्यापकः छात्रान् पाठयति ।

क-पाठस्य शालायां ख- पाठाय शालायां ग- पाठः शालायां

2- नूनम् सः महान् च असौ आत्मा अस्ति ।

क- महानात्मा ख- महात्मा ग- महदात्मा

3- रक्तोत्पलम् सरसः शोभाम् वर्धयति ।

क- रक्त उत्पलम् ख- रक्ता उत्पलम् ग- रक्तम् उत्पलम्

4- आकाशे कृष्णा: <u>वारिदा:</u> सन्ति ।

क- वारि ददति इति  ख-वारिं ददाति इति  ग- वारि ददाति इति

**प्रश्न०-6**-कोष्ठके प्रदत्तान् प्रकृतिप्रत्ययान् योजयित्वा वाक्यानि पुन: लिखत-[1x4=4 ]

1- पिता पुत्रम् उपादिशत् यत् त्वया कुमार्ग:-------- ( त्यज्+तव्यत् )

क- त्यजितव्य:ख- त्यक्तव्य:  ग- त्यज्तव्य:

2- --------- ( योग+इन्) जना: साफल्यम् प्राप्नुवन्ति ।

क- योगी  ख- यौगिन:  ग- योगिन:

3- य: नर: सत्यवादी-------- ( निष्ठा+मतुप्) च स: एव श्रेष्ठ: ।

क- निष्ठामत्  ख- निष्ठामान्  ग- निष्ठावान्

4- पुस्तकालये उच्चै: न -------------( वद्+ अनीयर् )

**प्रश्न०-7**- उचित अव्ययपदै: रिक्तस्थानानि पूरयित्वा वाक्यम् पुन: लिखत-[1x4=4 ]

1- जलम् -------------- मीन: न जीवति ।

क- तथा  ख- यथा  ग- विना  घ- नूनम्

2- यथा देश: ------------ वेश: ।

क-नूनम्  ख- एव  ग-तथा  घ- वृथा

3- ------------ चाणक्य नामधेय: महान् अर्थशास्त्री आसीत् ।

क- अधुना  ख- पुरा  ग- तथा  घ- सहसा

4- ------------- क्रियाम् न विद्धीत् ।

क- यथा  ख- इदानीम्  ग- सहसा  घ- अत्र

**प्रश्न०8**- अधोलिखिते संवादे वाच्यानुसारं रिक्तस्थानानि पूरयत-[1x4=4 ]

माता - किम् शिशु: वानरं (i) ---------------?

क- पश्यति  ख- दृश्यते  ग- पश्यामि

पुत्री- आम् (ii) ------------- वानर: दृश्यते ।

क- शिशवा  ख- शिशु:  ग- शिशुना

माता -किम् वानरं: शिशुं दृष्ट्वा अत्र आगच्छति ।

पुत्री- आम्, तेन शिशुं दृष्ट्वा अत्र (iii) -------------।

क- आगच्छयते  ख- आगम्यते  ग- आगच्छति

माता -पुत्री! किम् बालक: कोलाहलम् (iv) -----------।

क- क्रियते  ख- करोति  ग- करति

**प्रश्न०9-** विवाहस्य कार्यक्रमस्य समयं निमंत्रणपत्रे एव लिखितम् तत् संस्कृतेन लिखत। [1x4=4]

(i) 4.00 सायंकाले अश्वारोहणम् ।

(ii) 6.30 वादने वरयात्राया: प्रस्थानम् ।

(iii) 8.45 वादने वरमालाया: कार्यक्रम:।

(iv) 9.15 प्रात: वैदिकरीत्या पाणिग्रहण संस्कार: ।

**खण्ड: 'घ ' पठित अवबोधनम्- 30 अङ्का:**

**प्रश्न०10-** क) अधोलिखितं गद्यांशं, पद्यांशं नाट्यांशं च पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत-

**(क) गद्यांश:**

अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसख्याम् विलोक्य अचिन्तयत् 'मम अर्थिन: तु धनलाभमात्रेण संतोषं भजन्ते। नूनं ते दानवीरास्सौभाग्यशालिन: यान् याचका: शरीरस्य अङ्गानि  अपि याचन्ते।' एवं राज्ञ: स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम् ।राज्ञि एवं विचारयति सति तस्य दानशीलतां परीक्षितुं देवाधिपतिशक्र: नेत्रहीनयाचकस्य रुपं धारयित्वा तत्पुरत अवदत्- हे राजन्! भवत: दानवीरताम् आकर्ण्य आशान्वित: भवत्समीपम् आगतोऽस्मि। देवं रवि-शशि-तारा-मण्डलभूषितं जगत् एतत् कथमिव पश्येयम् चक्षुर्हीन

अ). एकपदेन उत्तरत - [1/2x2=1]

1) राज्ञ: निरासक्ति: केषु जाता ?

(क) याचकेषु (ख) स्वगात्रेषु (ग) दानशालाषु

2) नेत्रहीनयाचकरुपे तत्र क: आगत: ?

(क) मानव: (ख) राजा (ग) शक्र:

ब) पूर्णवाक्येन उत्तरत - [2]

1- किम् ज्ञात्वा सकलं ब्रह्माण्डम् व्याकुलम् सञ्जातम् ?

स). भाषिककार्यम्- [ 1/2x4=2]

1) ' भवत: दानवीरतां आकर्ण्य ' अत्यत्र ' भवत:' पदम् कस्मै प्रयुक्तम् ?

(क) नृपाय (ख) शक्राय (ग) याचकाय

2) ' भजन्ते ' इति क्रियापदस्य क: कर्ता ?

(क) मम (ख) अर्थिन: (ग) संतोषम्

3) ' जगत् ' इति पदस्य किम् विशेषणम् ? गद्यांशात् चित्वा लिखत।

4)' याचका: ' इत्यस्मिन् अर्थे क: शब्द: अत्र प्रयुक्त: ?

(क) सौभाग्यशालिन: (ख) अर्थिन: (ग) दानवीरा:

**प्रश्न०11- (ख) पद्यांश**:

किम् जीवितम्? अनवद्यम् , किम् जाड्यम् ? पाठतोऽप्यनभ्यास:।
को जागर्ति ? विवेकी , का निद्रा ? मूढता जन्तो:॥

अ)- एकपदेन उत्तरत - [1/2x2=1]

1- नरस्य मूर्खता अत्र का कथिता ?

क- अनवद्यम् ख- मूढता ग- निद्रा

2- संसारे विवेकी किम् करोति ?

क- जीवति ख- पठति ग- जागर्ति

ब) पूर्णवाक्येन उत्तरत - [2]

1- किम् जाड्यम् भवति ?

स) भाषिककार्यम् - [1/2x4=2]

1- ‘ जागर्ति ’ इत्यस्य क्रियापदस्य कर्तृपदम् किम्?

2- श्लोके ‘ जीवनस्य ’ इति पदस्य अर्थे किम् पदम् प्रयुक्तम् ?

क- जाड्यम् ख- जीवितम् ग- अनवद्यम्

3- ‘ अवद्यम् ’ इति पदस्य क: विपर्यय: अत्र श्लोके लिखित: ?

4- ‘ प्राणिन: ’ इत्यर्थे किम् पदम् श्लोके प्रयुक्तम् ?

क- विवेकी ख- पाठत: ग- जन्तो:

**प्रश्न०-12-ग) नाट्यांश:**

रवि: - अयि! गीता तु महाभारतस्य एव अंश: ।

संगीता - महाभारते तु कौरवपाण्डवानाम् युद्धम् वर्णितम् ।

रवि: - मुग्धे! किम् न जानासि तस्मिन् एव युद्धकाले श्रीकृष्ण: मोहग्रस्तम् अर्जुनं यत् उपादिशत् तदेव गीतायां निबद्धम् ।

संगीता - आम्! स्मरामि! परम् कस्तावत् उपदेश: ?

रवि: - तस्य उपदेशस्यैव एकम् अंशम् अद्य वयम् पठाम: किल। शीर्षकस्तु - ‘ अभ्यासवशगम् मन: ’।

संगीता - कोऽर्थ: अस्य शीर्षकस्य ?

रवि: - मन: चञ्चलम् परम् अभ्यासेन वशम् गच्छति ।

अ) एकपदेन उत्तरत - [1/2x2=1]

1- ‘ अभ्यासवशगम् मन: ’ इति पाठे श्लोका: कस्मात् ग्रन्थात् उदधृता: ?

क- रामायणात् ख- भगवदगीताया: ग- महाभारतेन

2- केषाम् युद्धै: श्रीकृष्ण: अर्जुनाय उपदेशम् कृतवान् ?

क- कौरवाणाम् ख- पाण्डवानाम् ग- कौरवपाण्डवानाम्

ब) पूर्णवाक्येन उत्तरत - [2]

1-‘ अभ्यासवशगम् मन: ’ इति शीर्षकस्य कोऽर्थ: ?

स) भाषिककार्यम् - [1x2=2]

1- ‘ मन: चञ्चलम् ’ अनयो: पदयो: किम् विशेषणपदम् ?

2- मन: चञ्चलम् परम् अभ्यासेन वशम् गच्छति। अस्मिन् वाक्ये ‘ गच्छति ’ क्रियाया: कर्तृपदम् किम्?

क- अभ्यासेन ख- मन: ग- वशे

**प्रश्न०-13**- अधोलिखितपदस्य भावार्थम् उपयुक्तपदै: पूरयित्वा लिखत-[1/2x4=2 ]

नास्ति विद्यासमम् चक्षु: नास्ति सत्यसमम् तप: ।  
नास्ति रागसमम् दु:खम् नास्ति त्यागसमम् सुखम् ॥

भावार्थ: - विद्या एव अस्माकम् (i) ----------- सत्यमेव वास्तविकम्(ii)-------
आसक्तितुल्यम् अन्यत् (iii)--------- नास्ति, (iv)---------- तुल्यम्
सुखम् नास्ति ।

**प्रश्न०-14**- अधोलिखितपद्यस्य अन्वयम् पूरयित्वा पुन: लिखत-[1/2x4=2 ]

धनस्य नि:सारलघो: स सारो यदीयते लोकहितोन्मुखेन ।
निधानताम् याति हि दीयमानम् , अदीयमानम् निधनैकनिष्ठम् ॥

अन्वय: - नि:सारलघो: (i)--------- स: सार: यत् लोकहितोन्मुखेन (ii)---------
दीयमानम्(धनम्) (iii)--------- हि याति (iv)----------- (धनम्)
निधनैकनिष्ठम् (भवति) ।

**प्रश्न०-15**- वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणम् कुरुत-[1x4=4 ]

1- राजा वैद्यान् आहूय अश्वरक्षार्थम् अपृच्छत् ।----------------
2- जलविन्दुनिपातेन क्रमश; पूर्यते घट: । ----------
3- मदोद्धता: कपय: वानरयूथपतिम् अवदन् । -----------
4- काम: एव क्रोधम् जनयति । ---------------

**प्रश्न०-16**- विलोमपदानि योजयत - [1x4=4]

| शब्दा: | विलोमपदानि |
|---|---|
| 1- मित्रणि | प्रकटरुपे |
| 2- मूर्खा: | अहितम् |
| 3-रहसि | प्राज्ञा: |
| 4- हितम् | रिपव: |

**प्रश्न०-17**-रेखाङ्कितपदानाम् प्रसङ्गानुसारम् शुद्धमर्थं चित्वा लिखत-[1x3=3 ]

1- सर्वदा सर्वदाऽस्माकम् सन्निधिम् क्रियात ।
क- सर्वम् ददाति इति   ख- सर्वाधिका   ग- सर्वम् वदति इति

2- तस्य प्रथमं एकम् चक्षु: प्रतिष्ठितम् अभवत् ।
क- आदरयोग्यम्   ख- प्रस्थानयोग्यम्   ग- स्थापितम्

3- आचार्यात् पादम् आदत्ते ।
क- पादम्   ख- चरणम्   ग- चतुर्थांशम्